मरः । २ । १ । १७ ॥ (यथा, मनुः । ४ । ३६ ।
"मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥")

चतुष्पथः, पुं, (चत्वारः पन्थानो ब्रह्मचर्य्यादय आश्रमा यस्य । "ऋक्पूरिति ।" ५ । ४ । ७४। इति अः ।) ब्राह्मणः । इति मेदिनी । थे २७ ॥

चतुष्पदः, पुं, (चत्वारि पदानि यस्य ।) पशुः । (यथा, बृहत्संहितायाम् । २१ । १७ ।
"तरवश्च निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥")
करणविशेषः । इति मेदिनी । दे । ४८ ॥ तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"चतुष्पदभवो मर्त्त्यः सदाचारविवर्जितः ।
स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः ॥"
"मेषवृषसिंहराशयः मकरपूर्व्वार्द्धं धनुःपरार्द्धञ्च ।"
इति दीपिका ॥
(चतुष्पदविशिष्टे । त्रि । यथा, महाभारते । १ । ६० । ११ ।
"चतुष्पदं द्विपदञ्चापि सर्व्वमेवं भूता गर्भभूता भवन्ति ॥"
व्याधिनिवारणोपायाः । यथा,—
"वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा ।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्ब्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्याये ॥)

चतुष्पदी, स्त्री,(चत्वारः पादा यस्याः । "संख्यासुपूर्व्वस्य ।" ५ । ४ । १४० । इति अन्तलोपे । "पादोऽन्यतरस्याम् ।" ४ । १ । ८ । इति ङीपि । "पादः पत् ।" ६ । ४ । १३० । इति पदादेशः ।) पद्यम् । इति मेदिनी । दे । ४८ ॥ चौपदी इति भाषा ॥ (यथा, छन्दोमञ्जर्य्याम् । १ स्तवके ।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥")

चतुष्पाटी, स्त्री, (चतसः दिशः पाटयति भिनत्तीति । पाटि + अण् + स्त्रियां ङीप् ।) नदी । इति शब्दमाला ॥

चतुष्पाठी, स्त्री, चतुर्णां वेदानां पाठो यस्यां सा । छात्राध्ययनस्थानम् । चौपाठी इति भाषा ॥ इति लोके प्रसिद्धिः ॥

चतुष्पाणिः, पुं, (चत्वारः पाणयो हस्ता यस्य ।) विष्णुः । इति हारावली । ६ ॥ (चतुर्हस्तविशिष्टे, त्रि ॥)

चतुःसमं, क्ली, (चतुर्णां चन्दनागुरुकस्तूरीकुङ्कुमानां समः समभागो यत्र । यद्वा, चतुर्भिश्चन्दनादिभिः समं एकत्र सहावस्थानं यत्र ।) मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम् । इति हेमचन्द्रः । ३ । ३०३ ॥ औषधविशेषः । यथा, सुखबोधे ।
"लवङ्गं सैन्धवं पथ्या यमानी च चतुःसमम् ।
आमशूलविबन्धघ्नं पाचनं भेदि शोथनुत् ॥"
अन्यच्च ।
"जातीफलं त्रिदशपुष्पसमन्वितञ्च
जीरञ्च टङ्गयुतं चरकेण चोक्तम् ।
चूर्णानि माक्षिकसितासहितानि लीढ़ा
आमातिसारमखिलं गुरु हन्ति शूलम् ॥"

चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत् । चौत्रिश् इति भाषा ॥ इति ज्योतिषम् ॥ (यथा, ऋग्वेदे । १ । १६२ । १८ ।
"चतुस्त्रिंशद्वाजिनो देवबन्धो
र्वङ्क्रीरश्वस्य स्वधितिः समेति ॥")

चतुस्त्रिंशज्जातज्ञः, पुं,(चतुस्त्रिंशज्जातं जानातीति। ज्ञा + "आतोऽनुपसर्गे कः ।"३।२।३। इति कः ।) बुद्धभेदः । इति हेमचन्द्रः । २ । १४७ ॥

चतूराजी, स्त्री, (चतुर्भिरङ्गैः राजते दीप्यते इति । राज् + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । स्त्रियां ङीप् ।) चतुरङ्गक्रीड़ाविशेषः । इति तिथ्यादितत्त्वम् ॥

चत्वरं, क्ली, (चत्यते स्वीक्रियते इति । चत + "कृगॄशॄदृ चतिभ्यः ष्वरच् ।" उणां । २ । १२१ । इति ष्वरच् ।) स्थण्डिलम् । होमार्थपरिष्कृता भूमिः । अङ्गनम् । इत्यमरः । २ । ७ । ८ ॥ उठान चाताल इति च भाषा ॥ (चतसृणां रथ्यानां सङ्गमः । इति शब्दार्थचिन्तामणिः ॥ यथा, महाभारते । ३ । १५ । २० ।
"अतुरथ्यासु सर्व्वासु चत्वरेषु च कौरव ! ।
बलं बभूव राजेन्द्र ! प्रभूतगजवाजिमत् ॥"
नानाजनपदेभ्यः समागतानां वासस्थानम् । मठ इति भाषा ॥ यथा, कथासरित्सागरे । ६।४१।
"कृत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम् ।
अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः ॥")

चत्वारः, त्रि, (चतुरशब्दस्य प्रथमाविभक्तेर्बहुवचनेन सिद्धेस्तथात्वम् ।) चतुःसंख्या । चारि इति भाषा ॥ इति व्याकरणम् ॥ तद्वाचकानि । वेदः१ ब्रह्मास्यम्२ वर्णः ३ समुद्रः४ हरिबाहुः५ स्वर्दन्तिदन्तः ६ सेनाङ्गम् ७ उपायः ८ यामः ९ युगम् १० आश्रमम् ११ वृत्तपादः १२ । इति कविकल्पलता ॥ चतुःसंख्याविशिष्टे त्रि । इत्यमरः॥

चत्वारिंशत्, स्त्री, (चत्वारो दशतः परिमाणमस्याः । "पङ्क्तिविंशतीति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ चल्लिश इति भाषा ॥ (यथा, भागवते । ४ । १ । ६० ।
"तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च ॥")

चत्वालः, पुं, (चत्यते प्रार्थ्यते स्वीक्रियते होमायेति । चत + "सानसिवर्णसिपर्णेति ।" वालन् न वृद्धिः ।) होमकुण्डम् । दर्भः । इति मेदिनी । ले । ८६ ॥ गर्भः । इति विश्वहेमचन्द्रौ ॥

चद, ए ज याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचदीत् । ञ, चदति चदते । इति दुर्गादासः ॥

चद, इ ह्लादे । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) इ, कर्म्मणि चन्द्यते । ह्लादो हर्षः । इति दुर्गादासः ॥

चदिरः, पुं, (चन्दति दीप्यते स्वशरीरादिना इति । चदि + बाहुलकात् किरच् निपातनात् नस्य लोपः ।) हस्ती । चन्द्रः । कर्पूरम् । भुजगः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चन, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चनति । इति दुर्गादासः ॥

चन, म हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं-सेट् ।) म, चनयति । इति दुर्गादासः ॥

चन, व अक्षाकल्यम् । अकार्त्स्न्यम् । यथा । किञ्चन । इत्यमरभरतौ ॥ ("किमः क्रमात् चित्चनौ ।" इति सूत्रेण ।) प्रत्ययोऽयं विभक्त्यन्तकिम्शब्दादुत्तरे भवति । इति मुग्धबोधम् ॥

चन्च, उ इतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, चञ्चित्वा चक्त्वा । इतिर्गतिः । इति दुर्गादासः ॥

चन्दः, पुं, (चन्दयति आह्लादयति यद्वा चन्दति दीप्यते इति । चन्दि वा चन्द + पचाद्यच् ।) चन्द्रः । इति भरतधृतशब्दार्णवः ॥

चन्दकः, पुं, (चन्दयति आह्लादयति लोकानिति । चदि ह्लादे + णिच् + "ण्वुल्तृचौ । ३ । १।१३३। इति ण्वुल् ।) मत्स्यविशेषः । चाँदा इति भाषा ॥ तस्य गुणः । रुचिबलकारित्वम् । अनभिष्यन्दित्वञ्च । इति राजवल्लभः ॥ चन्द्रकोऽपि पाठः ॥ (चन्द्रकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चन्दनः, पुं, क्ली, (चन्दयति आह्लादयतीति । चदि आह्लादे + णिच् + ल्युः ।) स्वनामख्यातवृक्षः । (यथा, गोः रामायणे । ५ । ७४ । ३ ।
"चन्दनांस्तिलकांश्चूतानशोकान् सिन्धुवारकान् ॥"
तथा च पञ्चतन्त्रे । १ । ४२ ।
"विना मलयमन्यत्र चन्दनं न प्ररोहति ॥")
तत्पर्य्यायः । गन्धसारः २ मलयजः ३ भद्रश्रीः ४ । इत्यमरः । २ । ६ । १३१ ॥ श्रीखण्डम् ५ महार्हम् ६ श्वेतचन्दनम् ७ गोशीर्षम् ८ तिलपर्णम् ९ मङ्गल्यम् १० मलयोद्भवम् ११ गन्धराजम् १२ सुगन्धम् १३ सर्पावासम् १४ शीतलम् १५ गन्धाढ्यम् १६ भोगिवल्लभम् १७ पाव-